**झम्पिन्** पु॰ झम्प+अस्त्यर्थे इनि । वानरे शब्दर॰ ।

**झर** पु॰ झॄ—अच् । निर्झरे उच्चाद्विनिर्गते जलप्रवाहे । "स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रमिमाततनोति यत्" नैष॰ । तस्य स्त्रीत्वं भरत आह ततः टाप् गौरा॰ ङीष् वा । "विपुलपुलिनाः कल्लोलिन्यो नितान्तपतज्झरास्खलितशिलाः शैलाः सान्द्रद्रुमा वनराजयः" प्रबोधच॰ ।२तारिण्यां स्त्री ङीष् झङ्कृताशब्दे उदा॰ ।

**झर्च** भर्त्सने च तुदा॰ पर॰ सक॰ सेट् । झर्चति अझर्चीत् । जझर्च ।

**झर्च्छ** भर्त्सने च तुदा॰ पर॰ सक॰ सेट् । झर्च्छति अझर्च्छीत् । जझर्च्छ । [अझर्झीत् । जझर्झ ।

**झर्झ** भर्त्सने च तुदा॰ पर॰ सक॰ सेट् । झर्झति

**झर्झर** पु॰ झर्झ—करच् । (झाँज) इति ख्याते १वाद्यभेदे २पटहे, ३कलियुगे, ४नदभेदे च । ५वाद्यभेदे स्त्री ङीप् मेदि॰ । ६वेत्रनिर्मितदण्डभेदे पु॰ "काञ्चनोष्णीषिणस्तत्र वेत्रझर्झरपाणयः" भा॰भी॰८८ अ॰ । ७वेश्यायां स्त्री त्रिका॰टाप् । ८तारादेव्यां स्त्री झङ्कृताशब्दे उदा॰। ९वाद्यभेदे स्त्रीशब्दर॰गौरा॰ङीष् ।१०पाकसाधने लौहमये (झाझरा) इति ख्याते पदार्थे पु॰ रत्नमा॰ । झर्झरः तद्वाद्यं शिल्पमस्य वा ठक् । झार्झरिक तद्वादनशीले त्रि॰ पक्षे अण् । झार्झर तदर्थे त्रि॰स्वार्थे क । झर्झरिका तारिण्यां झङ्कृताशब्दे उदा॰ ।

**झर्झरक** पु॰ झर्झर+संज्ञायां कन् । कलियुगे त्रिका॰ ।

**झर्झरावती** स्त्री झर्झरः शब्दभेदोऽस्त्यस्य मतुप् मस्य वः संज्ञायां पूर्वपददीर्घः । गङ्गायां झिराटीशब्दे उदा॰ ।

**झर्झरिन्** पु॰ झर्झरोऽस्त्यस्य इनि । शिवे "त्वं गदी त्वं शरी चापी खट्वाङ्गी झर्झरी तथा" भा॰ शा॰२८६अ॰।

**झर्झरीक** पु॰ झर्झ—ईकन् फर्फरीका॰ नि॰ । शरीरे उज्ज्वलद॰ । [ चाक्षालने शब्दार्थचि॰

**झलज्झला** स्त्री ज्वलन्तं ज्वलति अच् पृषो॰ । हस्तिकझला स्त्री झरा—पृषो॰ ।१कन्यायाम् २आतपोर्म्मौ च मेदि॰

**झल्ल** पुंस्त्री झर्छ किप् तं लाति ला—क रस्य लः । "झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च" मनूक्ते सवर्णायां व्रात्यक्षत्रियाज्जाते जातिभेदे । "झल्लामल्लानटाश्चैव पुरुषा शस्त्रवृत्तयः । द्यूतपानप्रसक्ताश्च जघन्या रजसी गतिः" । मनुना तस्य शस्त्रवृत्तित्व (नेटाली) मुक्तम् "तत्र झल्ला यष्टिप्रहरणाः" कुल्लूक॰ । "तत्र सूत्रात्तदा झल्लाः सूता वैतालिकास्तथा" भा॰स॰३अ॰।

**झल्लक** न॰ झर्छ—क्विप् तं लाति ला—क संज्ञायां रस्य लः । वाद्यभेदे कांस्यनिर्मितकरताले "शिवागारे झल्लकञ्च सूर्यागारे च शङ्खकम् । दुर्गागारे वंशिवाद्यं मधुरीं च न वादयेत्" ति॰ त॰ । तत्रार्थे स्त्री शब्दार्थचि॰ । गौरा॰ ङीष् ।

**झल्लकण्ठ** पुंस्त्री झल्लस्तत्स्वरः इव कण्ठः कण्ठस्वरोऽस्य । पारावते हारा॰ स्त्रियां जातित्वात् ङीष् ।

**झल्लरा** स्त्री झर्झति झर्ज—अरन् पृषो॰ । १झर्झरवाद्ये वाद्यभेदे २हुडुक्के ३बालककेशे मेदि॰४शुद्धे, ५क्लेदे च अजयपालः । गौरा॰ङीष् । झल्लरीत्यप्यत्रार्थे ।

**झल्लिका** स्त्री झर्झ—ण्वुल् पृषो॰१उद्वर्त्तनमले २द्योते ३दीप्तौ च शब्दार्थचि॰ ।

**झल्लीषक** न॰ हल्लीषक+पृषो॰। नृत्यभेदे "झल्लीषकन्तु ख्व॰ मेव कृष्णः सुवंशघोषं नरदेव ! पार्थ !" हरिवं॰१४८अ॰।

**झल्लोल** पु॰ झर्छ—क्विप् तथा सन् लोलः पृषो॰। तर्कुलासके (टेकुयार वाँटुल) हारा॰ । [जझाष झषः ।

**झष** बधे भ्वा॰पर॰ सक॰ सेट् । झषति अझाषीत् अझषीत् ।

**झष** ग्रहणे पिधाने च भ्वा॰ उभ॰ सक॰ सेट् । झषति—ते अझाषीत् अझषीत् अझषिष्ट । जझाष जझषे ।

**झष** पुं॰स्त्री झष—कर्मणि घ । मत्स्ये, अमरः स्त्रियां जातित्वात् ङीष् "वंशीकलेन वडिशेन झषीरिवास्मान्" आनन्दवृन्दावनचम्पूः २मकरे जलजन्तुभेदे "झषाणां मकरश्चास्मि" गीता ३मीनराशौ च "कार्मुकतौलिककन्या युग्मलवे झषगे वा" मु॰चि॰ । ४मकरराशौ "कार्मुकं तु परित्यज्य झषं संक्रमते रविः" मल॰त॰। भावे क ।५तापे । कर्त्तरि अच् । ६खिले, ७वने च न॰ । ८नागवलायां स्त्री शब्दार्थचि॰ । [शब्दार्थचि॰ झषकेतनादयोऽप्यत्र ।

**झषकेतु** पु॰ झषो मीनो मकरो वा केतुर्यस्य । मदने

**झषाङ्क** पु॰ झषोऽङ्कोऽस्य । १कन्दर्पे उपचारात् २तत्पुत्रे अनिरुद्धे च हेम॰ । [स्त्रियां जातित्वात् ङीष् ।

**झषाशन** पुंस्त्री॰ झषमश्नाति अश—ल्यु । शिशुमारे त्रिका॰

**झषोदरी** स्त्री झषस्योदरं जन्मस्थानतयास्त्यस्या अच् गौरा॰ ङीष् । मत्स्यगन्धायां व्यासमातरि सत्यवत्याम् त्रिकाण्डशेषः । सा च उपरिचरनृपस्य शुक्रेण ब्रह्मणः शापेन मत्स्ययोनिमापन्नायामद्रिकायाप्सरोभेदस्य गर्भाज्जाता तत्कथा भा॰ आ॰ ६३ अ॰ ।

"मत्प्रियार्थमिदं सौम्य ! शुक्रं मम गृहं नय । गिरिकायाः प्रयच्छाशु तस्या ह्यार्त्तवमद्य वै" ।"गृहीत्वा तु